# ॥ दृग्दृश्यविवेकः ॥

**|| dṛgdṛśyavivekaḥ ||**

रूपं दृश्यं लोचनं दृक् तद्दृश्यं दृक्तु मानसम् ।

दृश्या धीवृत्तयस्साक्षी दृगेव न तु दृश्यते ॥ १ ॥

rūpaṁ dṛśyaṁ locanaṁ dṛk taddṛśyaṁ dṛktu mānasam |
dṛśyā dhīvṛttayassākṣī dṛgeva na tu dṛśyate || 1 ||

नीलपीतस्थूलसूक्ष्मह्रस्वदीर्घादिभेदतः ।

नानाविधानि रूपाणि पश्येल्लोचनमेकधा ॥ २ ॥

nīlapītasthūlasūkṣmahrasvadīrghādibhedataḥ |
nānāvidhāni rūpāṇi paśyellocanamekadhā || 2 ||

आन्ध्यमान्द्यपटुत्वेषु नेत्रधर्मेषु चैकधा ।

संकल्पयेन्मनः श्रोत्रत्वगादौ योज्यतामिदम् ॥ ३ ॥

āndhyamāndyapaṭutveṣu netradharmeṣu caikadhā |
saṅkalpayenmanaḥ śrotratvagādau yojyatāmidam || 3 ||

कामः संकल्पसंदेहौ श्रद्धाऽश्रद्धे धृतीतरे ।

ह्रीर्धीर्भीरित्येवमादीन् भासयत्येकधा चितिः ॥ ४ ॥

kāmaḥ saṅkalpasandehau śraddhā'śraddhe dhṛtītare |
hrīrdhīrbhīrityevamādīn bhāsayatyekadhā citiḥ || 4 ||

नोदेति नास्तमेत्येषा न वृद्धिं याति न क्षयम् ।

स्वयं विभात्यथानन्यानि भासयेत् साधनं विना ॥ ५ ॥

nodeti nāstametyeṣā na vṛddhiṁ yāti na kṣayam |
svayaṁ vibhātyathānanyāni bhāsayet sādhanaṁ vinā || 5 ||

चिद्छायावेशतो बुद्धौ भानं धीस्तु द्विधा स्थिता ।

एकाहंकृतिरन्या स्यादन्तःकरणरूपिणी ॥ ६ ॥

cidchāyāaveśato buddhau bhānaṁ dhīstu dvidhā sthitā |
ekāhaṅkṛtiranyā syādantaḥkaraṇarūpiṇī || 6 ||

छायाहंकारयोरैक्यं तप्तायःपिण्डवन्मतम् ।

तदहंकारतादात्म्याद्देहश्चेतनतामगात् ॥ ७ ॥

chāyāhaṅkārayoraikyaṁ taptāyaḥpiṇḍavanmatam |
tadahaṅkāratādātmyāddehaścetanatāmagāt || 7 ||

अहंकारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः ।

सहजं कर्मजं भ्रान्तिजन्यञ्च त्रिविधं क्रमात् ॥ ८ ॥

ahaṅkārasya tādātmyaṁ cicchāyādehasākṣibhiḥ |
sahajaṁ karmajaṁ bhrāntijanyañca trividhaṁ kramāt || 8 ||

सम्बन्धिनोस्सतोर्नास्ति निबृत्तिसहजस्य तु ।

कर्मक्षयात् प्रबोधाच्च निवर्तेते क्रमादुभे ॥ ९ ॥

sambandhinossatornāsti nibṛttisahajasya tu ǀ
karmakṣayāt prabodhācca nivartete kramādubhe ǀǀ 9 ǀǀ

अहंकारलये सुप्तौ भवेद्देहोऽप्यचेतनः ।

अहंकारविकासर्द्धः स्वप्नः सर्वस्तु जागरः ॥ १० ॥

ahaṅkāralaye suptau bhaveddeho'pyacetanaḥ ǀ
ahaṅkāravikāsarddhaḥ svapnaḥ sarvastu jāgaraḥ ǀǀ 10 ǀǀ

अन्तःकरणवृत्तिश्च चितिच्छायैक्यमागता ।

वासनाः कल्पयेत् स्वप्ने बोधेऽक्षैर्विषयान् बहिः ॥ ११ ॥

antaḥkaraṇavṛttiśca citicchāyaikyamāgatā ǀ
vāsanāḥ kalpayet svapne bodhe'kṣairviṣayān bahiḥ ǀǀ 11 ǀǀ

मनोऽहंकृत्युपादानं लिङ्गमेकं जडात्मकम् ।

अवस्थात्रयमन्वेति जायते म्रियते तथा ॥ १२ ॥

mano'haṅkṛtyupādānaṁ liṅgamekaṁ jaḍātmakam ǀ
avasthātrayamanveti jāyate mriyate tathā ǀǀ 12 ǀǀ

शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम् ।

विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत् सृजेत् ॥ १३ ॥

śaktidvayaṁ hi māyāyā vikṣepāvṛtirūpakam |
vikṣepaśaktirliṅgādibrahmāṇḍāntaṁ jagat sṛjet || 13 ||

सृष्टिर्नाम ब्रह्मरूपे सच्चिदानन्दवस्तुनि ।

अब्धौ फेनादिवत् सर्वनामरूपप्रसारणा ॥ १४ ॥

sṛṣṭirnāma brahmarūpe saccidānandavastuni |
abdhau phenādivat sarvanāmarūpaprasāraṇā || 14 ||

अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।

आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥ १५ ॥

antardṛgdṛśyayorbhedaṁ bahiśca brahmasargayoḥ |
āvṛṇotyaparā śaktiḥ sā saṁsārasya kāraṇam || 15 ||

साक्षिणः पुरतो भाति लिङ्गं देहेन संयुतम् ।

चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः ॥ १६ ॥

sākṣiṇaḥ purato bhāti liṅgaṁ dehena saṁyutam |
citicchāyāsamāveśājjīvaḥ syādvyāvahārikaḥ || 16 ||

अस्य जीवत्वमारोपात् साक्षिण्यप्यवभासते ।

आवृतौ तु विनष्टायां भेदे भातेऽपयाति तत् ॥ १७ ॥

asya jīvatvamāropāt sākṣiṇyapyavabhāsate |
āvṛtau tu vinaṣṭāyāṁ bhede bhāte'payāti tat || 17 ||

तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति ।

या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन भासते ॥ १८ ॥

tathā sargabrahmaṇoośca bhedamāvṛtya tiṣṭhati |
yā śaktistadvaśādbrahma vikṛtatvena bhāsate || 18 ||

अत्राप्यावृतिनाशेन विभाति ब्रह्मसर्गयोः ।

भेदस्तयोर्विकारः स्यात् सर्गे न ब्रह्मणि क्वचित् ॥ १९ ॥

atrāpyāvṛtināśena vibhāti brahmasargayoḥ |
bhedastayorvikāraḥ syāt sarge na brahmaṇi kvacit || 19 ||

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।

आद्यत्रयं ब्रह्मरूपं जगत्रूपं ततो द्वयम् ॥ २० ॥

asti bhāti priyaṁ rūpaṁ nāma cetyaṁśapañcakam |
ādyatrayaṁ brahmarūpaṁ jagatrūpaṁ tato dvayam || 20 ||

खवाय्वग्निजलोर्वीषु देवतिर्यङ्नरादिषु ।

अभिन्नाः सच्चिदानन्दाः भिद्येते रुपनामनी ॥ २१ ॥

khavāyvagnijalorvīṣu devatiryaṅnarādiṣu |
abhinnāḥ saccidānandāḥ bhidyete rupanāmanī || 21 ||

उपेक्ष्य नामरूपे द्वे सच्चिदानन्दतत्परः ।

समाधिं सर्वदा कुर्याद् हृदये वाऽथवा बहिः ॥२२ ॥

upekṣya nāmarūpe dve saccidānandatatparaḥ |
samādhiṁ sarvadā kuryād hṛdaye vā'thavā bahiḥ ||22||

सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि ।

दृश्यशब्दानुवेधेन सविकल्पः पुनर्द्विधा ॥ २३ ॥

savikalpo nirvikalpaḥ samādhirdvividho hṛdi |
dṛśyaśabdānuvedhena savikalpaḥ punardvidhā || 23 ||

कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनम् ।

ध्यायेद्दृश्यानुविद्धोऽयं समाधिः सविकल्पकः ॥ २४ ॥

kāmādyāścittagā dṛśyāstatsākṣitvena cetanam |
dhyāyeddṛśyānuviddho'yaṁ samādhiḥ savikalpakaḥ || 24 ||

असङ्गः सच्चिदानन्दः स्वप्रभो द्वैतवर्जितः ।
अस्मीति शब्दविद्धोऽयं समाधिः सविकल्पकः ॥ २५ ॥

asaṅgaḥ saccidānandaḥ svaprabho dvaitavarjitaḥ |
asmīti śabdaviddho'yaṁ samādhiḥ savikalpakaḥ || 25 ||

स्वानुभूतिरसावेशाद्दृश्यशब्दावुपेक्ष्य तु ।
निर्विकल्पः समाधिः स्यान्निवातस्थितदीपवत् ॥ २६ ॥

svānubhūtirasāveśāddṛśyaśabdāvupekṣya tu |
nirvikalpaḥ samādhiḥ syānnivātasthitadīpavat || 26 ||

हृदीव बाह्यदेशेऽपि यस्मिन् कस्मिंश्च वस्तुनि ।
समाधिराद्यः सन्मात्रान्नामरूपपृथक्कृतिः ॥ २७ ॥

hṛdīva bāhyadeśe'pi yasmin kasmiṁśca vastuni |
samādhirādyaḥ sanmātrānnāmarūpapṛthakkṛtiḥ || 27 ||

अखण्डैकरसं वस्तु सच्चिदानन्दलक्षणम् ।
इत्यविच्छन्नचिन्तेयं समाधिर्मध्यमो भवेत् ॥ २८ ॥

akhaṇḍaikarasaṁ vastu saccidānandalakṣaṇam |
ityavicchannacinteyaṁ samādhirmadhyamo bhavet || 28 ||

स्तब्धीभावो रसास्वादात्तृतीयः पूर्ववन्मतः ।

एतैः समाधिभिः षड्भिर्नयेत् कालं निरन्तरम् ॥२९ ॥

stabdhībhāvo rasāsvādāttṛtīyaḥ pūrvavanmataḥ ।
etaiḥ samādhibhiḥ ṣaḍbhirnayet kālaṁ nirantaram ।।29 ।।

देहाभिमाने गलिते विज्ञाते परमात्मनि ।

यत्र यत्र मनो याति तत्र तत्र समाधयः ॥ ३० ॥

dehābhimāne galite vijñāte paramātmani ।
yatra yatra mano yāti tatra tatra samādhayaḥ ।। 30 ।।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ३१ ॥

bhidyate hṛdayagranthiśchidyante sarvasaṁśayāḥ ।
kṣīyante cāsya karmāṇi tasmin dṛṣṭe parāvare ।। 31 ।।

अवच्छिन्नश्चिदाभासस्तृतीयः स्वप्नकल्पितः ।

विज्ञेयस्त्रिविधो जीवस्तत्राद्यः पारमार्थिकः ॥ ३२ ॥

avacchinnaścidābhāsastṛtīyaḥ svapnakalpitaḥ ।
vijñeyastrividho jīvastatrādyaḥ pāramārthikaḥ ।। 32 ।।

अवच्छेदः कल्पितः स्यादवच्छेद्यं तु वास्तवम्।

तस्मिन् जीवत्वमारोपाद्ब्रह्मत्वं तु स्वभावतः॥ ३३॥

avacchedaḥ kalpitaḥ syādavacchedyaṁ tu vāstavam |
tasmin jīvatvamāropādbrahmatvaṁ tu svabhāvataḥ || 33 ||

अवच्छिन्नस्य जीवस्य पूर्णेन ब्रह्मणैकताम्।

तत्त्वमस्यादिवाक्यानि जगुर्नेतरजीवयोः॥ ३४॥

avacchinnasya jīvasya pūrṇena brahmaṇaikatām |
tattvamasyādivākyāni jagurnetarajīvayoḥ || 34 ||

ब्रह्मण्यवस्थिता माया विक्षेपावृतिरूपिणी।

आवृत्याखण्डतां तस्मिन् जगज्जीवौ प्रकल्पयेत्॥ ३५॥

brahmaṇyavasthitā māyā vikṣepāvṛtirūpiṇī |
āvṛtyākhaṇḍatāṁ tasmin jagajjīvau prakalpayet || 35 ||

जीवो धीस्थश्चिदाभासो भवेद्भोक्ता हि कर्मकृत्।

भोग्यरूपमिदं सर्वं जगत् स्याद्भूतभौतिकं॥ ३६॥

jīvo dhīsthaścidābhāso bhavedbhoktā hi karmakṛt |
bhogyarūpamidaṁ sarvaṁ jagat syādbhūtabhautikaṁ || 36 ||

अनादिकालमारभ्य मोक्षात् पूर्वमिदं द्वयम् ।

व्यवहारे स्थितं तस्मादुभयं व्यावहारिकम् ॥ ३७ ॥

anādikālamārabhya mokṣāt pūrvamidaṁ dvayam|
vyavahāre sthitaṁ tasmādubhayaṁ vyāvahārikam || 37 ||

चिदाभासस्थिता निद्रा विक्षेपावृतिरूपिणी ।

आवृत्य जिवजगतो पूर्वे नूत्ने तु कल्पयेत् ॥ ३८ ॥

cidābhāsasthitā nidrā vikṣepāvṛtirūpiṇī|
āvṛtya jivajagato pūrve nūtne tu kalpayet || 38 ||

प्रतीतिकाल एवैते स्थितत्वात् प्रातिभासिके ।

न हि स्वप्नप्रबुद्धस्य पुनः स्वप्ने स्थितिस्तयोः ॥ ३९ ॥

pratītikāla evaite sthitatvāt prātibhāsike|
na hi svapnaprabuddhasya punaḥ svapne sthitistayoḥ || 39 ||

प्रातिभासिकजीवो यस्तज्जगत् प्रातिभासिकम् ।

वास्तवं मन्यतेऽन्यस्तु मिथ्येति व्यावहारिकः ॥ ४० ॥

prātibhāsikajīvo yastajjagat prātibhāsikam |
vāstavaṁ manyate'nyastu mithyeti vyāvahārikaḥ || 40 ||

व्यावहारिकजीवो यस्तज्जगद् व्यावहारिकम्।

सत्यं प्रत्येति मिथ्येति मन्यते पारमार्थिकः॥४१॥

vyāvahārikajīvo yastajjagad vyāvahārikam |
satyaṁ pratyeti mithyeti manyate pāramārthikaḥ ||41 ||

पारमार्थिकजीवस्तु ब्रह्मैकयं पारमार्थिकम्।

प्रत्येति वीक्षते नान्यद्वीक्षते त्वनृतात्मना॥ ४२॥

pāramārthikajīvastu brahmaikayaṁ pāramārthikam |
pratyeti vīkṣate nānyadvīkṣate tvanṛtātmanā || 42 ||

मधुर्यद्रवशैत्यानि नीरधर्मास्तरङ्गके।

अनुगम्याथ तन्निष्ठे फेनेऽप्यनुगता यथा॥ ४३॥

साक्षिस्थाः सच्चिदानन्दाः सम्बन्धाद्व्यावहारिके।

तद्द्वारेणानुगच्छन्ति तथैव प्रातिभासिके॥ ४४॥

madhuryadravaśaityāni nīradharmāstaraṅgake |
anugamyātha tanniṣṭhe phene'pyanugatā yathā || 43 ||
sākṣisthāḥ saccidānandāḥ sambandhādvyāvahārike |
taddvāreṇānugacchanti tathaiva prātibhāsike || 44 ||

लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरङ्गके ।

तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा ॥ ४५ ॥

laye phenasya taddharmā dravādyāḥ syustaraṅgake |
tasyāpi vilaye nīre tiṣṭhantyete yathā purā || 45 ||

प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।

तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि ॥ ४६ ॥

prātibhāsikajīvasya laye syurvyāvahārike |
tallaye saccidānandāḥ paryavasyanti sākṣiṇi || 46 ||